শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী পরাঙ্কুশাষ্টকম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী পরাঙ্কুশাষ্টকম্ ॥

ত্রৈরিদ্যবৃদ্ধজনমূর্ধরিভূষণং যৎ
সম্পচ্চ সাত্ত্বিকজনস্য যদের নিত্যম্।
যদ্বা শরণ্যমশরণ্যজনস্য পুণ্যং
তৎসংশ্রযেম রকুলাভরণাভিঘ্র যুগ্মম্॥ **1**॥

ভক্তিপ্রভার ভরদদ্ভুতভারবন্ধ
সন্ধুক্ষিত প্রণযসাররসৌঘ পূর্ণঃ।
রেদার্থরত্ননিধিরচ্যুতদিব্যধাম
জীযাৎপরাঙ্কুশ পযোধিরসীম ভূমা॥ **2**॥

ঋষিং জুষামহে কৃষ্ণতৃষ্ণাতত্ত্বমিরোদিতম্।
সহস্রশাখাং যোঽদ্রাক্ষীদদ্রারিডীং ব্রহ্মসংহিতাম্॥ **3**॥

যদ্গোসহস্রমপহন্তি তমাংসি পুংসাং
নারাযণো রসতি যত্র সশঙ্খচক্রঃ।
যন্মণ্ডলং শ্রুতিগতং প্রণমন্তি রিপ্রাঃ
তস্মৈ নমো রকুলভূষণ ভাস্করায॥ **4**॥

পত্যুঃ শ্রিযঃ প্রসাদেন প্রাপ্ত সার্বজ্ঞ সংপদম্।
প্রপন্ন জনকূটস্থং প্রপদ্যে শ্রীপরাঙ্কুশম্॥ **5**॥

শঠকোপমুনিং রন্দে শঠানাং বুদ্ধি দূষণম্।
অজ্ঞানাং জ্ঞানজনকং তিন্ত্রিণীমূল সংশ্রযম্॥ **6**॥

ৱকুলাভরণং ৱন্দে জগদাভরণং মুনিম্।
যঃ শ্রুতেরুত্তরং ভাগং চক্রে দ্রাৱিড ভাষযা॥ **7**॥

ৱকুলালঙ্কৃতং শ্রীমচ্ছঠকোপ পদদ্বযম্।
অস্মৎকুলধনং ভোগ্যমস্তু মে মূর্ধ্নি ভূষণম্॥ **8**॥

নমজ্জনস্য চিত্তভিত্তি ভক্তি চিত্র তূলিকা
ভৱাহিৱীর্য ভঞ্জনে নরেন্দ্র মন্ত্র যন্ত্রণা।
প্রপন্ন লোক কৈরৱ প্রসন্ন চারু চন্দ্রিকা
শঠারি হস্ত মুদ্রিকা হঠাদ্ধুনোতু মে তমঃ॥ **9**॥

॥ শ্রী পরাঙ্কুশাষ্টকং সমাপ্তম্॥